No. १२२० घ

Title तर्कसंग्रहदीपिका शिशुहिताख्याटीकावा

Author अन्नं भट्टः

Extent ६ पत्राणि Age

Subject न्यायशास्त्रम्

तर्कसंग्रहदीपिका पिग्रास्तुद्दित्ताख्या
टीकावा

१२२०

पत्राणि ९

सन्भावे कृते कार्ये ऽतिव्याप्तिः स्यादतः पूर्ववृत्तीति । ननु तंतुरूपमपि पटं प्रति कारणं स्यात् इति चेन्न । अनन्यथासिद्धेति विशेषणात् । अनन्यथासिद्धत्वं
अन्यथासिद्धिविरहः । अन्यथासिद्धिश्च त्रिविधा । येन सहैव यस्य यं प्रति पूर्ववर्तित्वं अवगम्यते तत्तेनान्यथासिद्धं । यथा तंतुना तंतुत्वं च पटं प्रति । अन्यं प्र
ति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववर्तित्वमवगम्यते तं प्रति तदन्यथासिद्धं । यथा शब्दं प्रति पूर्ववर्तित्वे ज्ञाते एव पटं प्रति आकाशस्य । अन्यत्र क्लृप्तनियत
पूर्ववर्तिन एव कार्यसंभवे तत्सहभूतं अन्यथासिद्धं ॥ यथा पाकजस्थले गंधं प्रति रूपप्रागभावस्य । एवं च अनन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वं ।
कार्यलक्षणमाह । कार्यमिति । कारणं विभजते । कारणमिति । समवायिकारणं लक्षयति । यत्समवेतमिति । यस्मिन्समवेतमित्यर्थः ॥ असमवायिकारणलक्ष
यति । कार्येणेति । कार्येणेत्येतदुदाहरति । यथा तंतुसंयोग इति । कार्येण पटेन सह एकस्मिन् तंतौ समवेतत्वात् तंतुसंयोगः पटस्यासमवायिकारणं । कारणेन सह
त्येतदुदाहरति । तंतुरूपमिति । कारणेन पटेन सह एकस्मिन् तंतौ समवेतत्वात् तंतुरूपं पटरूपस्यासमवायिकारणमित्यर्थः ॥ निमित्तकारणं लक्षय
ति तदुभयेति । समवाय्यसमवायिभिन्नं निमित्तमित्यर्थः ॥ कारणलक्षणमुपसंहरति । तदेतदिति । प्रत्यक्षलक्षणमाह । तत्रेति । प्रमाणचतुष्टयमध्ये इत्य
र्थः ॥ प्रत्यक्षज्ञानस्य लक्षणमाह ॥ इंद्रियेति । इंद्रियं चक्षुरादि । अर्थो घटादिः । तयोः सन्निकर्षः संयोगादिः तज्जन्यं ज्ञानमित्यर्थः ॥ निर्विकल्पकलक्ष
णमाह । निःप्रकारकमिति । विशेषणविशेष्यानवगाहिज्ञानमित्यर्थः । ननु निर्विकल्पके किं प्रमाणमिति चेन्न । गौरिति विशिष्टज्ञानं विशेषणज्ञानज
न्यं विशिष्टज्ञानत्वात् दंडीति ज्ञानवत् इत्यनुमानस्य प्रमाणत्वात् विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसंगात् निर्विकल्पकसि
द्धिः ॥ सविकल्पकं लक्षयति । सप्रकारकमिति । नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः । सविकल्पकमुदाहरति । यथेति । इंद्रियार्थसन्नि
कर्षं विभजते । प्रत्यक्षेति । संयोगसन्निकर्षमुदाहरति । चक्षुषेति । द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्ष इत्यर्थः । आत्मा मनसा संयुज्यते । मन इंद्रियेण । इंद्रिय
मर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते । संयुक्तसमवायमुदाहरति । घटरूपेति । तत्र युक्तिमाह । चक्षुःसंयुक्त इति । संयुक्तसमवेतसमवायमुदाहरति । रूपत्वेति ।

स्तकृविभागः। द्वितीयः कायद्युक्तकविभागः॥ परत्वापरत्वयोर्लक्षणमाह- परापरेति- परव्यवहारकारणं परत्वं- अपरव्यवहारकारणं अपरत्वमित्यर्थः॥ तेभ
ते- नैद्विविधेति- दिक्कृतयोरुदाहरणमाह॥ दूरस्थ इति- कालकृते उदाहरति- ज्येष्ठेति- कनिष्ठेति- गुरुत्वं लक्षयति- आद्येति- द्वितीयादिपतनस्य वेगासमवायिका
रणत्वात्- वेगे ऽतिव्याप्तिवारणायाद्येति- द्रवत्वं लक्षयति- स्यंदनेति- स्यंदनस्त्रवणं- तेजःसंयोगजन्यं नैमित्तिकं- तद्भिन्नं सांसिद्धिकं- पृथिव्यां नैमित्तिकमुदाहर
ति- घृतादाविति- तेजसि तदाह- सुवर्णादाविति- स्नेहं लक्षयति- चूर्णेति- कालादावतिव्याप्तिवारणाय गुण इति- रूपादावतिव्याप्तिवारणाय पिंडीभाव इति- श
तेप ब्दं लक्षयति- श्रोत्रेति- शब्दे ऽतिव्याप्तिवारणाय गुणइति- रूपादावतिव्याप्तिवारणाय श्रोत्रेति। शब्देति- शब्दस्त्रिविधः॥ संयोगजो विभागजः शब्दजश्चेति- त उ
त्राद्यः॥ भेरीदंडसंयोगजः। द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटायमानः शब्दः॥ भेर्यादिदेशमारभ्य श्रोत्रपर्यंतं द्वितीयादिशब्दाः शब्दजाः॥ बुद्धेर्लक्ष
१ माह लो बुद्धिरिति- भानामीत्यनु[illegible]व्यवसायगम्यज्ञानत्वमेव लक्षणमित्यर्थः। बुद्धिं विभजते- सेति- स्मृतेर्लक्षणमाह- संस्कारेति- भावनाख्यः संस्कारः। सं
स्कारध्वंसे ऽतिव्याप्तिवारणाय ज्ञानमिति- घटादिप्रत्यक्षे ऽतिव्याप्तिवारणाय संस्कारजन्यमिति- अनुभवं लक्षयति- तद्भिन्नमिति- स्मृतिभिन्नं ज्ञानमनुभ
व इत्यर्थः॥ अनुभवं विभजते- स द्विविध इति- यथार्थानुभवस्य लक्षणमाह- तद्वतीति- ननु घटे घटत्वमिति प्रमायामव्याप्तिः। घटत्वे घटाभावादिति चे
न- यत्र यत्संबंधोस्ति तत्र तत्संबंधानुभव इत्यर्थात्- घटत्वे घटसंबंधो प्यस्ति इति नाव्याप्तिरिति अनुभव एव नात्र प्रमेत्युच्यत इत्यर्थः। अयथार्था
नुभवं लक्षयति- तदभाववतीति- ननु इदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न- यदवच्छेदेन यत्संबंधाभावः तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षितत्वा
त्- संयोगाभावावच्छेदेन यत्संयोगज्ञानस्य भ्रमत्वात्- संयोगावच्छेदेन संयोगसंबंधस्य सत्वात् नातिव्याप्तिः॥ यथार्थानुभवं विभजते- यथार्थेति- प्रसंग
प्रमाकरणं विभजते- तत्करणं प्रमाणं करणमित्यर्थः॥ प्रमाकरणं प्रमाणमिति प्रसंगात् करणलक्षणं- करणलक्षणमाह- असाधारणे[illegible]ति- साधार
णकारणे दिक्कालादौ अतिव्याप्तिवारणाय असाधारणेति- कारणलक्षणमाह- कार्येति- पूर्ववृत्ति कारणमित्युक्ते रासभादौ अतिव्याप्तिस्यादतो नियतेति- ता

निश्चयः। शंकायाश्च तद्विरहः क्वचित्तर्कात् क्वचित्स्वतःसिद्ध एव। धूमाग्निव्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्षणस्तर्को व्यभिचार
शंकानिवर्तकः। ननु सकलवह्निधूमयोरसन्निकर्षात्कथं व्याप्तिग्रहः इति चेन्न। धूमत्ववह्नित्वसामान्यलक्षणप्रत्यासत्त्या
सकलधूमवह्निज्ञानसंभवात्। तस्मादिति। लिंगपरामर्शादित्यर्थः। परार्थानुमानमाह। यत्त्विति। यच्छब्दस्य तत्परार्थानुमानं इति श
ब्देनान्वयः। पंचावयववाक्यमुदाहरति। यथेति। अवयवस्वरूपमाह। प्रतिज्ञेति। उदाहृते वाक्ये प्रतिज्ञादिविशेषमाह। पर्वतो वह्निमा
निति। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पंचम्यंतं लिंगप्रतिपादकं हेतुः। व्याप्तिप्रतिपादकमुदाहरणं। पक्षधर्मताज्ञानार्थमुपनयः।
अबाधितत्वादिकं निगमनं प्रयोजनं। अनुमितिकरणमाह। स्वार्थेति। ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यां अनुमितिसंभवे विशि
ष्टलिंगपरामर्शः किमर्थमंगीकर्तव्य इति चेन्न। वह्निव्याप्यधूमवानिति शाब्दपरामर्शस्थले परामर्शस्य आवश्यकत्वेन लाघ
वेन सर्वत्र परामर्शस्यैव करणत्वात्। लिंगं न करणं अतीतादौ व्यभिचारात्। व्यापारवत्कारणं करणमिति मते परामर्शद्वारा
व्याप्तिज्ञानं करणं। तज्जन्यत्वे सति तज्जन्यजनको व्यापारः। अनुमानमुपसंहरति। तस्मादिति। लिंगं विभजते। लिंगमिति। अन्व
यव्यतिरेकि लक्षयति। अन्वयेनेति। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः। तदभावयोर्व्यतिरेकव्याप्तिः। केवलान्वयिनो लक्षणमाह। अ
न्वयेनेति। केवलान्वयिसाध्यकं केवलान्वयि। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं। ईश्वरप्रमाविषयत्वं सर्वदाभिधेयत्वं च
सर्वत्रास्तीति व्यतिरेकाभावः। व्यतिरेकिणमुदाहरति। पृथिवीति। ननु इतरभेदः प्रसिद्धो न वा। आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वे

ाप्यरूपादिज्ञानजन्यमिति परामर्शस्येति पुरुषस्यैवेति प्रत्यक्षजन्न। नचतत्रानुमितिरेवेति वाच्यं। पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधादिति ...

समवायमुदाहरति। श्रोत्रेति। तमुपपादयति। कर्णेति। ननु दूरस्थशब्दस्य कथं श्रोत्रसंबंध इति चेन्न। वीचीतरंगन्यायेन कदंबगोलकन्यायेन वा श(२)
ब्दांतरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य शब्दस्य श्रोत्रसंबंधात्प्रत्यक्षसंभवात्। समवेतसमवायमुदाहरति। शब्दत्वेति। विशेषणभावमुदाहरति। अभावो न।
तमुपपादयति। घटाभाव इति। भूतले घटो नास्तीत्यत्र अभावस्य विशेष्यत्वं द्रष्टव्यं। एतेन अनुपलब्धेः प्रमाणांतरं निरस्तं। यद्यत्र घटो ऽभविष्यत्तदा
भूतलमिवाद्रक्ष्यत्। दर्शनाभावान्नास्तीति तर्कितप्रतियोगिसत्वविरोध्यनुपलब्धिसहकृतेनेंद्रियेणैव अभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणांत
रासंभवात्। च अधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्यैव करणत्वोपपत्तौ अनुपलब्धेः करणत्वस्यायुक्तत्वात्। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरू
२ पमेवनातिरिक्तः संबंधः। प्रत्यक्षज्ञानमुपसंहरन् तस्य करणमाह। एवमिति। असाधारणकारणत्वादिंद्रियं प्रत्यक्षज्ञानकरणमित्यर्थः। प्रत्यक्षमुपसंहरति।
तस्मादिति॥ ॥अनुमानं लक्षयति। अनुमितिकरणमिति। अनुमितेर्लक्षणमाह। परामर्शेति। ननु संशयोत्तरप्रत्यक्षे ऽतिव्याप्तिः स्थाणुपुरुषसंशया
नंतरं पुरुषत्वसहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्। सिसाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता। साध्यसिद्धिरनुमितिप्रतिबंधिका। सिद्धि
सत्वेप्यनुमित्यां सिसाधयिषायामनुमितिदर्शनात्। सिसाधयिषोत्तेजिका। तथा चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत्। सिसाधयिषाविरहविशि
ष्टसिद्ध्यभावस्यानुमितिकरणत्वं। परामर्शं लक्षयति। व्याप्तीति। व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थः। परामर्शमभिनीय दर्शयति।
यथेति। अनुमितिमभिनीय दर्शयति। तज्जन्यमिति। परामर्शजन्यमित्यर्थः। व्याप्तेर्लक्षणमाह। [illegible] यत्रेति। यत्र धूम इति व्याप्तेरभिनयः।
साहचर्यनियम इति लक्षणं। साहचर्यं सामानाधिकरण्यं तस्य नियमः। हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसामानाधिकरण्यं व्याप्तिरि
त्यर्थः। पक्षधर्मतास्वरूपमाह। व्याप्यस्येति। स्वार्थानुमितिं दर्शयति। स्वयमेवेति। भूयोदर्शनेनेति। ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्श
नेपि व्यभिचारोपलब्धेः भूयोदर्शनेन कथं व्याप्तिग्रह इति चेन्न। व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात्। व्यभिचारज्ञा

[illegible]त्वात् । अभावाभावो भाव एव । नातिरिक्तः । अनवस्थाप्रसंगात् । ध्वंसप्रागभावो ध्वंसस्य प्रतियोग्येव । अभावाभावो अतिरिक्त एव । न [illegible]
नानवस्थेति नवीनाः । ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां [illegible]
[illegible] न्यायशास्त्रे षोडश पदार्थानामुक्तत्वात् कथं सप्तैवेत्यत आह । सर्वेषामिति । सप्तस्वेवान्तर्भाव इत्यर्थः । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गा
स्तु प्रमेयम् [illegible] द्वादशविधं प्रमेयं । प्रवृत्तिर्धर्माधर्मौ । रागद्वेषमोहा दोषाः । रागः इच्छा । द्वेषो मन्युः । मोहः शरीरादावात्मभ्रमः । प्रेत्यभावो मरणं । फलं भोगः । अपवर्गो मोक्षः । स च [illegible]
[illegible]नाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः । प्रयोजनं सुखं दुःखहानिश्च । दृष्टान्तो महानसादिः । प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः । निर्णयो निश्चयः । प्रमा[illegible]
[illegible]तत्त्वबुभुत्सोः कथा वादः । उभयसाधनवती विजिगीषुकथा जल्पः । स्वपक्षस्थापनाहीना वितण्डा । कथा नानावक्तृकपूर्वोत्तरवाक्यसंदर्भः । अभिप्रायान्तरेण प्रयुक्तस्यार्थान्त
रं प्रकल्प्य दूषणं छलं । असदुत्तरं जातिः । सा साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यवि
[illegible]शेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमा जातयः । वादिनो अपजयहेतुर्निग्रहस्थानं । प्रतिज्ञाहानिः । प्रतिज्ञान्तरं । प्रतिज्ञाविरोधः । प्रतिज्ञासंन्यासः । हे
[illegible] अर्थान्तरं निरर्थकं । अविज्ञातार्थं अपार्थकं । अप्राप्तकालं न्यूनं । अधिकं पुनरुक्तं । अननुभाषणं अज्ञानं । अप्रतिक्षेपः अमतानुज्ञा । पर्यनुयोज्योपेक्ष
[illegible]योज्यानुयोगः । अपसिद्धान्तः हेत्वाभासश्चेति निग्रहस्थानं । शेषं सुलभं । ननु करतलानलसंयोगे सत्यपि प्रतिबन्धके सति दाहानुत्पत्तेः शक्तिः पदार्थान्तरमिति
चेन्न । प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात् । कारणस्यैव शक्तिपदार्थत्वात् । ननु भस्मादिना कांस्यादेः शुद्धिदर्शनात् आधेयशक्तिरंगीकार्येति चेन्न
भस्मादिसंयोगसमानकालीनअस्पृश्यस्पर्शप्रतियोगिकयावद्ध्वंसविशिष्टभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् । स्वत्वमपि न पदार्थान्तरं । यथेष्टविनियोगयो
ग्यत्वस्य स्वत्वरूपत्वात् । तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति । अथ विधिर्निरूप्यते । प्रयत्नजनक[illegible]चिकीर्षाजनकज्ञानविषयो विधिः । तत्र [illegible]कालिङु
[illegible] इष्टसाधनत्वं प्रकृत्यर्थः [illegible] दर्शनात् । कृतिसाध्यताज्ञानं प्रवर्तकं । न च विषभक्षणादौ प्रवृत्तिप्रसंगः । इष्टसाधनताज्ञानलिङ्कृतिसाध्यताज्ञानस्य काम्यस्थले । बलिहितबालजी
[illegible]निमित्तज्ञानजन्यस्य नित्यनैमित्तिकस्थले प्रवर्तकत्वात् । न चाननुगमः । स्वविशेषबलवदनिष्टाप्रतिसंधानस्य अनुगतत्वात् इति गुरवः । तन्न । लाघवेन कृतिसाध्येष्ट
साधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात् । न च नित्ये इष्टसाधनताभावादप्रवृत्तिप्रसंगः । तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलस्य कल्पनात् । तस्मा

कृतिसाध्येष्टसाधनत्वमेव लिङर्थः। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लिङर्थस्य स्वर्गसाधनत्वस्य कार्यं प्रतीयते यागस्य आशुविनाशित्वेन कालान्तरभाविस्वर्गसा-
योगात् तच्चोपपादयितुं कार्यं अपूर्वमेव लिङर्थः। कार्यं कृतिसाध्यं कृतेः स्वविषयत्वात्। विषयतां यागो विषयत्वेनान्वेति। कस्य कार्यमिति जिज्ञासायां कामि-
कामपदं नियोज्यपरतयान्वेति। कार्यबोद्धा नियोज्यः। तेन ज्योतिष्टोमनामकयागविषयं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते। वैदिकलिङ्त्वात्। यावज्जीवमग्निहोत्रं
जुहुयादित्यादौ नित्यनाम्यपि अपूर्वं लिङर्थः कल्प्यते। आरोग्यकामो भेषजपानं कुर्यादित्यादौ लौकिकलिङ्गं क्रियायार्थे लक्षणेति चेन्न। यागस्याप्यपूर्वतानिश्चया-
3 भावेन […]तत्प्राप्त्यनन्तरं तात्पर्यार्थं अवान्तरव्यापारतया अपूर्वकल्पनात्। कीर्तनादिना नाशश्रुतेः। न यागध्वंसो व्यापारः। […] कल्प्यतामिव
कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति। लिङत्वेन रूपेण विध्यर्थः। आख्यातत्वेन प्रयत्नार्थकत्वं पचतीति पाकं करोतीति विवरणदर्शनात्। किं करोतीति प्रश्ने पचतीति
उत्तरदर्शनाच्च आख्यातस्य प्रयत्नार्थत्वनिश्चयात्। रथो गच्छतीत्यादौ अनुकूलव्यापारे लक्षणा। देवदत्तः पचतीत्यादौ देवदत्तेन पच्यते तण्डुल इत्यादौ कर्तृकर्मणोराख्यातार्थत्वं
[…]कृतत्वैकत्वादिनामेव तयोराक्षेपादेव लाभः। प्रजयतीत्यादौ धातोरेव प्रकर्षो [illegible]। उपसर्गाणां द्योतकत्वमेव न तत्र शक्तिरिति। पदार्थज्ञानस्य परमप्रयोजनं
मोक्षः। तथाहि आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां मोक्षसाधनत्वबोधनात्। श्रुत्या देहादिविलक्षणात्मज्ञाने सत्यप्यसं-
भावनानिवृत्तेः युक्त्यनुसंधानरूपमननसाध्यत्वात्। मननोपयोगिपदार्थनिरूपणद्वारा न्यायशास्त्रस्यापि मोक्षोपयोगः। तदनन्तरं श्रुत्या यदि […]ध्याननिदिध्यासि-
तेन […] देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरनाशात्। तन्नाशाभावे पूर्वे
[…] तेन […] रभावात्। तन्नाशाभावे पूर्वधर्माधर्मयोस्तु भोगेन नाशे चरमदुःखध्वंसलक्षणो मोक्षो जायते। ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः ज्ञानमात्रसाध्यत्वात्। तमेव विदित्वा
अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति साधनान्तरनिषेधाच्च। ननु तत्प्राप्तिहेतुर्ज्ञानं कर्म चोक्तं महामुने इति कर्मणोऽपि मोक्षसाधनत्वस्मरणात्। ज्ञानकर्मस-
मुच्चय इति चेन्न। नित्यनैमित्तिकैर्वं कुर्यात् प्रत्यवायं ज्ञानं च विमलीकुर्वन् अभ्यासेन च पाचयेत्। अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः इत्यादिना कर्मणो ज्ञानसा-
धनत्वप्रतिपादनात्। ज्ञानद्वारेण कर्म मोक्षसाधनं न साक्षात्। तस्मात् पदार्थज्ञानात् मोक्षः परमप्रयोजनमिति सर्वं रमणीयम्। इति श्रीमदनन्तोपाध्यायकृततर्कसंग्रहदीपि-
कासमाप्ता॥ [illegible] सदाशिवार्पणमस्तु॥ ॥ [illegible] नारायण [illegible] इदं पुस्तकं [illegible]

असाधारणधर्मव्याख्यावर्तकः ०१

चे३

तिव्याप्तिः। यथा गोः शृंगित्वं। लक्ष्यमात्रावर्तनमसंभवः। यथा गोरेकशफत्वं। एतद्दूषणत्रयरहितो धर्मो लक्षणं। स एवासाधारणधर्म इत्युच्यते। लक्ष्यतावच्छेदकस-
मनियतत्वमसाधारणत्वं। व्यावर्तकस्यैव लक्षणत्वे व्यावृत्तेरभिधेयत्वादौ जातिव्याप्तिः। तद्वारणाय तद्भिन्नत्वं धर्मविशेषणं देयं। व्यवहारस्यापि लक्षणप्रयोजनत्वेन देयं। व्यावर्ता-
देरेव व्यवहारसाधनत्वात्। ननु गुणवत्त्वं न द्रव्यलक्षणं। आद्यक्षणे उत्पन्नविनष्टघटे चाव्याप्तिरिति चेन्न। गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्। ननु एव-
मेकरूपं परस्मात् यथाग्नि तैरूपादौ अतिव्याप्तिरिति चेन्न। एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानंगीकारात्। गुणं विभजते रूपेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गु-
णः। गुणत्वजातिर्मान्या। ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिर्गुणाः। इति चेन्न। लघुत्वस्य गुरुत्वाभावरूपत्वात् मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरू-
पत्वात्। कर्म विभजते उत्क्षेपणेति। संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म। कर्मत्वजातिमत्त्वं। भ्रमणादीनामपि गमनेऽन्तर्भावान्न पंचत्वविरोधः। सामान्यं विभजते परमिति।
परमधिकदेशवृत्ति। अपरं न्यूनदेशवृत्ति। सामान्यादिचतुष्टये जातिर्नास्ति। विशेषं विभजते नित्येति। पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपंचकं च नित्यद्रव्याणि। स-
मवायस्य भेदो नास्ति अत आह समवायस्त्वेक इति। अभावं विभजते प्रागभावेति। तत्र उद्देशक्रमानुसारात् प्रथमं पृथिव्या लक्षणमाह गन्धवतीति। नाम्ना पदार्थसंकीर्तनमुद्दे-
शः। उद्देशक्रमे सर्वत्र वैधर्म्यं नियामकं। ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादनादव्याप्तिः। न च गन्धप्रतीत्यनुपपत्तिरिति वाच्यं। अवयवगन्धस्यैव
तत्प्रतीतिसंभवेन चित्रगन्धानंगीकारात्। किंचोत्पन्नविनष्टघटे आद्यक्षणेऽव्याप्तिरिति चेन्न। गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात्। ननु जलादावपि गन्धप्र-
तीतेरतिव्याप्तिरिति चेन्न। अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव भानांगीकारात्। ननु कालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेऽतिव्याप्तिरिति चेन्न। सर्वाधारताप्रयोजकसं-
बंधभिन्नसंबंधेन लक्षणस्य विवक्षितत्वात्। पृथिवीं विभजते सा द्विविधेति। नित्यत्वं ध्वंसाप्रतियोगित्वं। ध्वंसप्रतियोगित्वमनित्यत्वं। प्रकारान्तरेण त्रिधा विभजते पुनस्त्रिविधेति।
आत्ममनोयोगायतनं शरीरं। यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनं। सुखदुःखसाक्षात्कारो भोगः। ~~शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रय~~
त्वमिन्द्रियत्वं। शरीरेन्द्रियभिन्नो विषयः। एवं गन्धवच्छरीरं पार्थिवं शरीरं। गन्धवदिन्द्रियं पार्थिवेन्द्रियं। गन्धवान् विषयः पार्थिवविषयः। इति तल्लक्षणं बोध्यं। पार्थिवं शरीरं दर्शय-
ति शरीरमिति। इन्द्रियं दर्शयति इन्द्रियमिति। गन्धग्राहकमिति प्रयोजनकथनं घ्राणमिति संज्ञा। नासाग्रवर्तीत्याश्रयोक्तिः। एवमुत्तरत्र ज्ञेयं। पार्थिवविषयं दर्शयति मृत्पाषाणेति।
अपां लक्षणमाह शीतेति। उत्पन्नविनष्टे जले आद्यक्षणेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वेन तात्पर्यं। शीतत्वं [illegible] ज्ञातत्वमित्यादौ न संबंधः

नो चे३ गो३

तन्न ६ तथापि ६

१

ग्री तत्र स्पर्शवान् इति नातिव्याप्तिः। अन्यत् सर्वं पूर्ववत् व्याख्येयं। तेजसो लक्षणमाह॥ उष्णस्पर्शवदिति। उष्णस्पर्शनिमित्तप्रतीतेः। अतः तेजः संबंधानुविधायी। चेतनेः
व्याप्तिः। विभजं दर्शयति। भौमेति। ननु सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात् हरिद्रादिवदिति चेन्न। अत्यंतानलसंयोगे सति घृतादेर्द्रवत्वदर्शनेन तत्र तत्स्य
घृतेनाशादर्शने न असति प्रतिबंधे पार्थिवद्रवत्वरूपनाशाग्निसंयोगयोः कार्यकारणभावधारणात्। सुवर्णस्य अत्यंतानलसंयोगे सति तैः अनुच्छिद्यमान
द्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः। तस्मात् पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः। रू
पवत्तया वाय्वादिष्वनंतर्भावात् तैजसत्वसिद्धिः। तस्योष्णस्पर्शभास्वररूपयोः रूपस्पर्शाभिभवकपार्थिवरूपस्पर्शाभ्यां प्रतिबंधादनुपलब्धिः। तस्मात् सुवर्णं तैजसमिति
ते वायुं लक्षयति। रूपरहित इति। आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादावतिव्याप्तिवारणाय रूपरहित इति। ननु प्राणस्य कुतो न वायोर्भेद इत्यत आह।
शरीरेति। स चेति। एकः प्राणः स्थानभेदात् नैकसंज्ञां प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः। स्पर्शानुमेयो वायुः। तथा हि। योयं वायौ वाति सति अनुष्णाशीतस्पर्शो भा
सते स स्पर्शः। क्वचिदाश्रितः गुणत्वात् रूपवत्। न चास्य पृथिव्याश्रयः उद्भूतस्पर्शवतः पार्थिवस्य उद्भूतरूपवत्त्वनियमात्। न जलतेजसी अनुष्णाशीतत्वात्
विभुत्वं न कुड्ये। सर्वत्रोपलब्धिप्रसंगात्। न मनः। तस्मात् परमाणुस्पर्शस्यातींद्रियत्वात्। तस्मात् प्रतीयमानस्पर्शाश्रयः स वायुः। ननु वायुः प्रत्यक्षः प्र
स्पर्शाश्रयत्वात् इति चेन्न। उद्भूतरूपवत्त्वस्योपाधित्वात्। यत्र द्रव्यत्वे सति बहिरिंद्रियप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकत्वं। पक्षे साधनाव्यापकत्वं
न चैवं। तथा वायोरपि तेजसोप्यप्रत्यक्षत्वापत्तिः। इष्टत्वात्। तस्माद्रूपरहितत्वात् वायुरप्रत्यक्षः। इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्य उत्पत्तिविनाशक्रमः क
ते ईश्वरचिकीर्षावशात् परमाणुषु क्रिया जायते ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते। त्रिभिर्द्व्यणुकैः त्र्यणुकमुत्पद्यते। एवं चतुरणुकादिक्रमेण
महती पृथिवी। महत्य आपः। महत्तेजः। महान् वायुरुत्पद्यते। एवमुत्पन्नस्य कार्यस्य संजिहीर्षावशात् क्रियया परमाणुद्वयविभागे सति द्व्यणुकनाशः ततः चतुरणुक
नाशः इत्येवं पृथिव्यादिनाशः समवायिकारणनाशात् असमवायिकारणनाशादिति संप्रदायः। सर्वत्रासमवायिकारणनाशाद् द्रव्यनाशः इति नवीनाः। ननु परमा
णौ वेदिमानं उत्पन्नं जालसूर्यमरीचिस्थं सूक्ष्मम् उपलभ्यते यत् तत्सावयवं चाक्षुषद्रव्यत्वात् पटवत्। त्र्यणुकावयवोपि सावयवः। महदारंभकत्वात् तंतुवत्॥ मोक्ष

नौ५ नि२

वयवः स एव परमाणुः स च नित्यः। कार्यत्वे अनवस्थाप्रसंगात्। सृष्टिस्थितिप्रलयसद्भावे धाता यथापूर्वमकल्पयदिति श्रुतिः प्रमाणं॥ सर्वकार्यध्वंसो अवान्तरप्र-
सर्वकार्यध्वंसो महाप्रलय इति विवेकः॥ आकाशं लक्षयति। शब्दगुणमाकाशमिति। ननु आकाशमपि किं पृथिव्यादिवन्नाना नेत्याह। तच्चैकमिति। भेदे प्रमाणाभावादि-
एकत्वादेव सर्वत्रोपलब्धेः। विभुत्वमंगीकर्तव्यमित्यत आह। विभ्विति। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं। मूर्तत्वं परिच्छिन्नपरिमाणवत्वं॥ क्रियावत्वं वा। विभुत्वादेवात्मवन्नि-
त्यमित्याह। नित्यं चेति। कालं लक्षयति। अतीतेति। सर्वाधारः कालः। सर्वकार्यनिमित्तकारणं च। दिशो लक्षणमाह। प्राचीति। दिगपि कार्यमात्रे निमित्तकारणं॥ आत्मनो लक्षणमा-
ह। ज्ञानेति। आत्मानं विभजते। स च द्विविध इति। परमात्मनो लक्षणमाह। तत्रेति। ईः नित्यज्ञानाधिकरणत्वं ईश्वरत्वं। ननु ईश्वरसद्भावे किं प्रमाणं। न तावत्प्रत्यक्षं। तद्धि बाह्यं आंत-
रं वा। नाद्यः॥ अरूपिद्रव्यत्वात्। नांत्यः॥ आत्मसुखादिव्यतिरिक्तत्वात्। नाप्यनुमानं। लिंगाभावादिति चेन्न। अंकुरादिकं। कर्तृजन्यं। कार्यत्वात्। घटवत्। इत्यनुमानस्य प्र-
माणत्वात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वं। उपादानं समवायिकारणं। सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वं। यः सर्वज्ञः सर्वविदित्यागमो-
पि तत्र प्रमाणं। जीवस्य लक्षणमाह। जीवेति। सुखादिकं जीवलक्षणं। ननु मनुष्योहं ब्राह्मणोहं इत्यादौ सर्वत्राहंप्रत्यये शरीरस्यैव विषयत्वात् शरीरमेवात्मेति चेन्न।
शरीरस्य करपादादिनाशे शरीरनाशेन आत्मनो विनाशप्रसंगात्। नापीन्द्रियाणां आत्मत्वं। सोहमिदानीं स्पृशामि इत्यनुसंधानात्। यो हं घटमद्राक्षं सो हमिदानीं
स्पृशामि इत्यनुसंधानाभावप्रसंगात्। अन्यानुभूते अन्यस्यानुसंधानायोगात्। तस्मात् देहेन्द्रियव्यतिरिक्तो जीवः॥ सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। न च प-
रमाणुः शरीरव्यापिसुखानुपलब्धिप्रसंगात्। न मध्यमपरिमाणः। तथा सत्यनित्यत्वप्रसंगात्। तस्मान्नित्यो विभुर्जीवः॥ मनसो लक्षणमाह। सुखेति। स्प-
र्शरहितत्वे सति क्रियावत्वं मनसो लक्षणं। मनो विभजते। तच्चेति। एकैकस्यात्मनः एकैकं मनः इत्यात्मनामनेकत्वात् मनसोप्यनेकत्वमित्यर्थः। परमाणुरूपमिति। मध्य-
मपरिमाणत्वे अनित्यत्वप्रसंगादित्यर्थः। ननु मनोपि विभु स्पर्शरहितद्रव्यत्वात् आकाशवदिति चेन्न। मनसो विभुत्वे आत्ममनःसंयोगस्यासमवायि-
स्याभावात् ज्ञानानुत्पत्तिप्रसंगात्। न च विभुद्वयसंयोगोस्तीति वाच्यं तत्संयोगस्य नित्यत्वे सुषुप्त्यभावप्रसंगात्। पुरीतद्व्यतिरिक्तप्रदेशे आत्ममनःसंयोग-

मि५ तेति १

वंतादिषमानत्वात् अणुत्वेनुपलभमनः पुरीतति प्रविशति तदा सुषुप्तिः। यदा निःसरति तदा ज्ञानोत्पत्तिरिति अणुत्वसिद्धिः॥ रूपं लक्षयति। च
तिसंख्यादावतिव्याप्तिनिवारणाय मात्रपदं। रूपत्वे अतिव्याप्तिवारणाय गुणपदं। नन्वव्याप्यवृत्तिनीलादिसमुदाये चित्ररूपमिति चेन्न। रूपस्यैव
व्याप्यवृत्तित्वनियमात्। ननु चित्रपटे अवयवरूपस्यैव प्रतीतिरिति चेन्न। रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसंगात्। न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयो
5 जकं गौरवात्। तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः। रसं लक्षयति। रसनेति। रसत्वे अतिव्याप्तिवारणाय गुणपदं। रसाश्रयमाह। पृथिवीति। आश्रयं दि भे
दर्शयति। पृथिव्यामिति। गंधं लक्षयति। घ्राणेति। गंधत्वे अतिव्याप्तिनिवारणाय गुणपदं। स्पर्शं लक्षयति। त्वगिंद्रियेति। स्पर्शत्वे अतिव्याप्तिवारणाय गुणपदं। संयोगाद
वतिव्याप्तिवारणाय मात्रपदं॥ पाकजमिति। पाकः तेजःसंयोगः। तेन पूर्वरूपं नश्यति रूपान्तरमुत्पद्यत इत्यर्थः। अत्र परमाणुष्वेव पाकः न द्व्यणुकादिषु। आमपाकनिक्षिप्त
घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणवः समवायिकारणं। तेजःसंयोगः असमवायिकारणं। अदृष्टादिकं
निमित्तकारणं। द्व्यणुकादिरूपे कारणरूपं असमवायिकारणमिति। पीलुपाकवादिनः। पूर्वघटस्य नाशं विनैव अवयविन्यवयवेषु परमाणुपर्यन्तेषु युगपद्रूपान्तरो
त्पत्तिरिति पिठरपाकवादिनो नैयायिकाः। अत एव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः॥ अन्यत्र [illegible]दावित्यर्थः। नित्यगतमिति। परमाणुगतमित्यर्थः। अनित्य
गतमिति द्व्यणुकादिनिष्ठमित्यर्थः। रूपादिचतुष्टयमुद्भूतं प्रत्यक्षं प्रयोजको धर्मः तदभावः अनुद्भूतत्वं। संख्यां लक्षयति। एकेति। परिमाणं लक्षयति। मानेति। परि
माणं विभजते। तच्चेति। भावप्रधानो निर्देशः॥ अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः॥ पृथक्त्वं लक्षयति। पृथगिति व्यवहारकारणमित्यर्थः॥ संयोगं लक्षयति। संयु
क्त इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः॥ संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाय असाधारणेति। संयोगो द्विविधः॥ कर्मजः संयोगजश्च। आद्यो
हस्तक्रियया पुस्तकसंयोगः॥ द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः। अव्याप्यवृत्तिः संयोगः। स्वात्यंताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वं। विभागं लक्षय
ति। संयोगेति। कालादावतिव्याप्तिवारणाय गुण इति। रूपादावतिव्याप्तिवारणाय संयोगनाशक इति। विभागोऽपि द्विविधः॥ कर्मजो विभागजश्चेति। आद्यो हस्त

अनुद्भूत × दि... प्रत्यक्षत्वं ... इदमस्मात्पृथगिति

सत्वं गंगापदवाच्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरेपि शक्तिर्नैकल्प्यते· सैंधवादौ लवणाश्वयोः परस्परसंबंधाभावान्नानाशक्तिकल्पनं· ल
क्षणा त्रिविधा॥ ॥जहल्लक्षणा· अजहल्लक्षणा· जहदजहल्लक्षणा चेति· यत्र वाच्यार्थस्यान्वयाभावः तत्र जहती· यथा मंचाः क्रोशंतीति· यत्र वाच्यस्या
प्यन्वयस्तत्र अजहती· यथा छत्रिणो गच्छंतीति· यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहती· यथा तत्त्वमसीति· गौण्यपि लक्षणैव लक्ष्य
माणगुणसंबंधरूपा· अग्निर्माणवक इति· व्यंजनापि शक्तिलक्षणान्तर्भूता· अर्थशक्तिमूला च· अनुमानादिना अन्यथासिद्धा· तात्पर्यानुपपत्तिर्लक्षणाबीजं·
तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं· तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः। नानार्थानुरोधात्· प्रकरणादिकं तात्पर्यग्राहकं· द्वारमित्यादौ पिधेहीति शब्दाध्याहारः। ननु
अर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्याहारासंभवात्· अर्थाध्याहार एव युक्त इति चेन्न· पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वात्· अन्यथा
घटकर्मत्वमानयनं कृतिरित्यत्रापि शाब्दज्ञानप्रसंगात्· पंकजादिपदेषु योगरूढिः। अवयवशक्तिर्योगः। समुदायशक्तिः रूढिः। नियतपद्मज्ञानार्थं स
मुदायशक्तिः। अन्यथा कुमुदेपि प्रयोगप्रसंगः। इतरान्विते शक्तिरिति प्राभाकराः। अन्वयस्य वाक्यार्थतया भानसंभवात्· अन्वयांशेपि शक्तिर्न कल्प्य
नेति गौतमीयाः। आकांक्षेति· आकांक्षादिज्ञानमित्यर्थः। अन्यथा आकांक्षादिभ्रमात् शाब्दभ्रमो न स्यात्· आकांक्षां लक्षयति· पदस्येति· अर्थेति· सन्नि
धिलक्षणमाह· पदानामिति· अविलंबेन पदार्थोपस्थितिः सन्निधिः। उच्चारणं तु तदुपयोगितयोक्तं· गौरश्व इति· घटः कर्मत्वमित्यनाकांक्षोदाहरणं·
दुष्टत्वे· वैदिकस्याविशेषमाह· वैदिकं ईश्वरोक्तत्वादिति· ननु वेदस्यानादेः कथं ईश्वरोक्तत्वमिति चेन्न· वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवत्· नन्व
चा
स्मर्यमाणकर्तृत्वमुपाधिः। गौतमादिभिः शिष्यपरंपरया वेदेपि कर्तृस्मरणेन साधनव्यापकत्वात्· तस्मात्पक्षेपानाद्युपायो वेदा अज्ञायंतर इति नेत्यर्थः·
ननु वर्णा नित्याः स एवायं गकार इति प्रत्यभिज्ञाबलात्· तथा च कथं वेदस्यानित्यत्वमिति चेन्न· उत्पन्नो गकारो विनष्टो गकार इति प्रतीत्या वर्णानामनित्य
त्वात्· सोयं गकार इति प्रत्यभिज्ञा सेयं दीपज्वालेतिवत्· जात्यालंबनत्वात्· वर्णानां नित्यत्वेपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च· तस्मादीश्वरोक्तो
वेदः। मन्वादिस्मृतीनां आचाराणां च वेदमूलकत्वेन प्रामाण्यं· स्मृतिमूलकवाक्यानामिदानीमनध्ययनात् तन्मूलभूता का[illegible]शाखोत्सन्नेति क

स्याते। अनुपलभ्यमाने वेदे वाक्यत्वादस्य कल्पयितुमशक्यत्वात् विप्रकीर्णवादस्याप्रयुक्तत्वात्। निःपानुमेयो वेदोऽकल्पितः इति चेन्न। तथापि

नाभावेन बोधकत्वासंभवात्। ननु एतानि पदानि स्मारितार्थसंसर्गवंति। आकांक्षादिमत्पदकदंबत्वात्। मद्वाक्यवत्। इत्यनुमानादेव संसर्गज्ञानसंभ

वात्। शब्दो न प्रमाणांतरमिति चेन्न। अनुमित्यपेक्षया शाब्दज्ञानविलक्षणस्य शब्दात्प्रत्येमीत्यनुव्यवसायसाक्षिकस्य सर्वसंमतत्वात्। ननु अर्थापत्ति

रपि प्रमाणांतरमस्ति। पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा रात्रिभोजनं पीनत्वान्यथानुपपत्त्या अर्थापत्त्या रात्रिभोजनं कल्प्यत इति चेन्न। देवदत्तो रात्रौ भुं

क्ते दिवा अभुंजानत्वे सति पीनत्वात्। इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात्। एतेन चार्थापत्तिसंभवोऽप्यनुमानमेव। इह वटे यक्षोऽस्तीत्यैतिह्यमपि

ज्ञानमूलकत्वे [illegible]क शब्द एव। चेष्टापि शब्दानुमानद्वारा व्यवहारहेतुरिति न मानांतरं। तस्मात्प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वार्येव प्रमाणानि। ज्ञानानां तद्व

ति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वेति विचार्यते। तत्र विप्रतिपत्तिः। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावद्ज्ञानग्राहकसामग्रीग्राह्यं न वा। अत्र विधि

कोटिः स्वतस्त्वं। निषेधकोटिः परतस्त्वं। अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति। इदं ज्ञानं अप्रमेति ज्ञाने न प्रामाण्यग्रहात्। बाधवारणाय अप्र

माण्याग्राहकेति। इदं ज्ञानमप्रमेति अनुव्यवसायनिष्ठप्रामाण्यग्राहकस्य अप्रामाण्याग्राहकत्वाभावात्तत्र स्वतस्त्वं न स्यात्। अतस्तदिति। तस्मिन्प्रामाण्याश्रये अ

प्रामाण्यग्राहकेत्यर्थः। उदाहृतस्थले व्यवसायेऽप्रामाण्यग्राहकस्यापि अनुव्यवसायेतद्ग्राहकत्वात्स्वतस्त्वसिद्धिः। ननु स्वत एव प्रामाण्यं गृह्यते। घट

महं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबंधस्यापि विषयीकरणात्। व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात्। पुरोवर्तिनि प्रकारसंबंधस्यैव प्रमा

त्वपदार्थत्वादिति चेन्न। स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमा न वेत्यनभ्यासदशायां प्रामाण्यसंशयो न स्यात्। अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात्।

तस्मात्स्वतो ग्राह्यत्वाभावात् परतो ग्राह्यत्वं। तथाहि। प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा। समर्थप्रवृत्तिजनकत्वात्।

यन्नैवं तन्नैवं। यथा अप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते। द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्सजातीयत्वलिंगेन अन्वयव्याप्तिरेकेनापि गृह्यते।

प्रमायां गुणजन्यं उ स्वतो परतस्त्वं प्रमा असाधारणकारणं गुणः। अप्रमा असाधारणकारणं दोषः। तत्र प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः। अ

छिन्नानित्यत्वव्यापकं भावत्वं॰ चतुर्थस्तु प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं॰ बाधितस्य लक्षणमाह॰ यस्ये
ति॰ अत्र बाधकस्य साध्याभावनिश्चयत्वेन॰ सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबंधकत्वं॰ इतरे चानुपरामर्शप्रतिबंधकत्वं॰
तत्रासाधारणस्य व्यभिचाराज्ञानतया विरुद्धस्य सामानाधिकरण्याज्ञानतया व्याप्यत्वासिद्धस्य विशिष्टव्याप्यभावतया असाधारणानुपसंहारि
णोर्व्याप्तिसंशयाधायकत्वेन च व्याप्तिज्ञानप्रतिबंधकत्वं॰ आश्रयासिद्धस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबंधकत्वं॰ उपाधेस्तु व्यभिचारज्ञा
नद्वारा व्याप्तिज्ञानप्रतिबंधकः। सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धे अंतर्भवति॰ निग्रहस्थानान्तरमिति नवीनाः॥ २॥ उपमा
नं लक्षयति॰ उपमितीति॥ ३॥ शब्दं लक्षयति॰ आप्तेति॰ पदलक्षणमाह॰ शक्तमिति॰ अर्थस्मृत्यनुकूलपदपदार्थसंबंधः शक्तिः। सा च पदार्था
न्तरमिति मीमांसकाः। तन्निरासार्थमाह॰ अस्मादिति॰ डित्थादीनामिव घटादीनामपि संकेत एव शक्तिः। न तु पदार्थान्तरमित्यर्थः॥ गवादिशब्दानां
जातावेव शक्तिः। विशेषणतया जातेः प्रथममुपस्थितत्वात्॰ व्यक्तिलाभस्तु आक्षेपादिनेति केचित्॰ तन्न॰ गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रानय
नादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात्॰ शक्तिग्रहश्च वृद्धव्यवहारेण॰ व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रव
णानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवामानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य
अश्वमानय गां बधानेति वाक्यांतरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्वपदस्य अश्वत्वविशिष्टे इति व्युत्पद्यते॰ ननु सर्वत्र कार्यपरत्वा
द्व्यवहारस्य कार्यवाक्य एव व्युत्पत्तिः। न सिद्धपर इति चेन्न॰ काश्यां त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारात्॰ विकसितपद्मे मधूनि मधुक
रः पिबतीत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेपि मधुकरादिव्युत्पत्तिदर्शनाच्च॰ लक्षणापि शब्दवृत्तिः। शक्यसंबंधो लक्षणा॰ गंगायां घोष इ ८

अन्वयित्वं॰ असत्वे असाधारण्यं॰ द्वितीये साध्यज्ञानाभावात् कथं शिष्टानुमितिः। विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात्॰
प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेन्न॰ जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां
7 मेलनं पृथिव्यां साध्यते॰ त्रयोदशत्वावच्छिन्नसाध्यस्य एकाधिकरणवृत्तित्वाभावान्नान्वयित्वासाधारण्ये॰ प्रत्येकाधिकरणप्रसिद्ध्या त
त्साध्यविशिष्टानुमितिः व्यतिरेकिव्याप्तिनिरूपणं चेति। पक्षलक्षणमाह॰ संदिग्धेति॰ ननु श्रवणानंतरं जातमननस्थले अव्याप्तिः।
तत्र वेदवाक्यैरात्मनो निश्चिततत्वेन संदेहाभावात्॰ किं च प्रत्यक्षेपि वह्नौ यत्रेच्छयाऽनुमितिः। तत्राव्याप्तिरिति चेन्न॰ उक्तपक्षताश्रयत्वस्य
पक्षताश्रयत्वस्य पक्षलक्षणत्वात्॰ सपक्षलक्षणमाह॰ निश्चितेति॰ विपक्षलक्षणमाह॰ निश्चितेति॰ एवं सद्धेतुं निरूप्य असद्धेतुं निरूपयि
तुं विभजते॰ सव्यभिचारेति॰ अनुमितिप्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं॰ सव्यभिचारं विभजते॰ सत्रिविधइति॰ साधारणं लक्ष
यति॰ तत्रेति॰ उदाहरति॰ यथेति॰ असाधारणं लक्षयति॰ सचेति॰ अनुपसंहारिणो लक्षणमाह॰ अन्वयेति॰ विरुद्धं लक्षयति॰ साध्येति॰ सत्प्र
तिपक्षं लक्षयति॰ यस्येति॰ असिद्धं विभजते॰ आसिद्धइति॰ आश्रयासिद्धमुदाहरति॰ गगनेति॰ स्वरूपासिद्धमुदाहरति॰ स च शब्दइति॰ व्याप्यत्वा
सिद्धलक्षणमाह॰। सोपाधिको व्याप्यत्वासिद्धइति उपाधिलक्षणमाह॰ साध्येति॰ उपाधिश्चतुर्विधः। केवलसाध्यव्यापकः। पक्षधर्मावच्छि
न्नसाध्यव्यापकः। साधनावच्छिन्नसाध्यव्यापकः। उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति॰ आद्यः। आर्द्रेधनसंयो ग॥ द्वितीयो यथा॰ वायुः प्र
त्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षव्यापकं उद्भूतरूपवत्वं॰ तृतीयो यथा॰ प्रागभावो विनाशी ज न्यत्वादित्यत्र जन्यत्वाव

नुमितौ व्यापकवत्ति व्याप्यज्ञानं · उपमितौ यथार्थसादृश्यज्ञानं शाब्दज्ञाने · यथार्थयोग्यताज्ञानमित्याद्यूह्यं · पुरोवर्त्तिनि प्रकाराभावस्य व्यवसायेन ... २
पस्थितत्वात् · अप्रमात्वं परत एव गृह्यते · चित्रादिदोषजन्यत्वादुत्पत्तौ परतस्त्वं · ननु सर्वज्ञानानां यथार्थत्वात् अयथार्थज्ञानमेव नास्ति · न च शुक्ता
विदं रजतमिति ज्ञानात् प्रवृत्तिदर्शनात् अन्यथाख्यातिरिति वाच्यं · रजतस्मृतिपुरोवर्त्तिज्ञानाभ्यामेव प्रवृत्तिसंभवात् · उपस्थितेष्टभेदाग्रहस्यैव
सर्वत्र प्रवर्त्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभावादिति चेन्न · सत्यरजतस्थले पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्र
वृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेनावशिष्टज्ञानस्यैव कल्पनात् · अयथार्थं तु त्रिविधं विभजते · अयथार्थेति · स्वप्नस्य मानसवि
पर्ययरूपत्वान्न त्रैविध्यविरोधः ॥ संशयलक्षणमाह · एकेति · घटपटाविति समूहालंबनेऽतिव्याप्तिवारणाय एकेति · घटो द्रव्यमित्या
दावतिव्याप्तिवारणाय विरुद्धेति · पटत्वविरुद्धघटत्ववानित्यत्रातिव्याप्तिवारणाय नानेति · विपर्ययलक्षणमाह · मिथ्येति · तदभाववति
तत्प्रकारकनिश्चय इत्यर्थः ॥ तर्कं लक्षयति · व्याप्येति · यद्यपि तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणानुग्राहकत्वात् भेदेन कीर्तनं ॥ स्मृतिं
विभजते · स्मृतिरिति · सुखं लक्षयति · सर्वेषामिति · सुख्यहमित्याद्यनुव्यवसायगम्यसुखत्वादिकमेव लक्षणं · यथाश्रुतं तु स्वरूपकथ
नमिति द्रष्टव्यं ॥ संस्कारं विभजते · संस्कार इति · संस्कारत्वजातिमान्संस्कारः ॥ वेगस्याश्रयमाह · वेगत्वजातिमान्वेगः ॥ भावनां लक्षयति · अनुभ
वेति · आत्मादावतिव्याप्तिवारणाय अनुभवेति · अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृतीति · स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तं · स्थित
स्थापकं लक्षयति · अन्यथेति · संख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः ॥ अन्ये रूपादयो विशेषगुणाः ॥ द्रव्यवि
भाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वं · कर्मणो लक्षणमाह · चलनेति · उत्क्षेपणादीनां कार्यभेदमाह · ऊर्ध्वेति · ...

८

ति॰ वक्रतासंपादकमाकुंचनं॰ ऋजुतासंपादकं प्रसारणमित्यर्थः।सामान्यं लक्षयति॰ नित्यमिति॰ परमाणुपरिमाणादावतिव्याप्तिवारणाय
अनेकेति॰ अनुगतत्वं समवेतत्वं॰ तेन नाभावादावतिव्याप्तिः।विशेषं लक्षयति॰ नित्येति॰ समवायं लक्षयति॰ नित्येति॰ संयोगेऽतिव्याप्तिवा
रणाय नित्य इति॰ आकाशादावतिव्याप्तिवारणाय संबंध इति॰ अयुतसिद्धिलक्षणमाह॰।ययोरिति॰ नीलो घट इति विशिष्टप्रतीतिर्विशेष
णविशेष्यसंबंधविषया विशिष्टप्रत्ययत्वात् दंडी पुरुष इतिवत्॰ इति समवायसिद्धिः।अवयवावयविनाविति॰ इत्यसमवायिकारणमवयवः
२ जन्यद्रव्यमवयवि॰ प्रागभावं लक्षयति अनादिरिति॰ आकाशादावतिव्याप्तिवारणाय सांत इति॰ घटादावतिव्याप्तिवारणाय अनादिरिति॰ प्रति
योगिसमवायिकारणवृत्तिः प्रतियोगिजनकश्च विद्यतीति व्यवहारहेतुः प्रागभावः।ध्वंसं लक्षयति॰ सादिरिति॰ घटादावतिव्याप्तिवारणाय
४ अनंतेति॰ आकाशादावतिव्याप्तिवारणाय सादिरिति॰ प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वस्तव्यवहारहेतुर्ध्वंसः।अत्यंताभावं लक्षयति
त्रैकालिकेति॰ अन्योन्याभावेऽतिव्याप्तिवारणाय संसर्गावच्छिन्नेति॰ ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इति॰ अन्योन्याभावं लक्षयति॰ तादात्म्ये
१ ति॰ प्रतियोगितावच्छेदकतारोप्य संसर्गभेदादेकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोर्वैलक्षण्यं॰ केवलदेवदत्ताभावादौ द्रव्याभाव इति प्रतीत्या विशिष्टाभावः प
कसत्वे द्वौ न स्तः इति प्रतीत्या साहित्यावच्छिन्नाभावः।संयोगसंबंधेन घटवति समवायसंबंधेन घटाभावः।तत्र घटाभावो घटत्वावच्छिन्नप्रतियोगिकसामान्य
भावश्च अतिरिक्तः।एवमन्योन्याभावोऽपि घटत्वावच्छिन्नः पटो नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते॰ पटे घटत्वं नास्तीत्यर्थः।अतिरिक्तो वे
सकेवलान्वयी॰ सामयिकाभावोऽत्यंताभाव एव॰ समयविशेषप्रतीयमानः घटाभाववति घटानयने अत्यंताभावस्यान्यत्र गमनाभावेऽपि अप्रतीतेः।घटाप
सारणे सति प्रतीतेः।केवलघटसंयोगप्रागभावध्वंसयोरत्यंताभावप्रतीतिनियामकत्वं कल्प्यते॰ घटवति तत्प्रागभावध्वंसयोरसत्वात् अत्यंताभावस्याप्र
तीतिः।घटापसारणे संयोगध्वंसत्वात् नास्तीति॰ केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावो न पदार्थांतरमिति गुरवः।तन्न॰ अभावानंगीकारे केवलस्य स

संयोगप्रा

॥श्रीगणेशाय नमः॥ विश्वेश्वरं सांबमूर्तिं प्रणिपत्य गिरं गुरुं॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां॥१॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमित-
पं श्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्काररूपं मंगलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते· निधायेति· ननु मंगलस्य समाप्तिसाधनत्वं नास्ति· मंगले कृतेपि किर-
णावल्यादौ समाप्त्यदर्शनात्· मंगलाभावेपि कादंबर्यादौ समाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारादिति चेन्न· किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः।
कादंबर्यादौ ग्रंथाद्बहिरेव मंगलं कृतं अतो न व्यभिचारः। ननु मंगलस्य कर्तव्यत्वे किं मानमिति चेन्न। शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात्· तथाहि· मंगलं वेदबोधित-
कर्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत्· भोजनादौ व्यभिचारवारणाय अलौकिकेति· रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति· शिष्टपदं स्पष्टा-
र्थं कुर्यान्निष्फले कर्मणि जलताडनादेः विनिषिद्धत्वात्· तर्क्यंते प्रतिपाद्यंत इति तर्काः· द्रव्यादिपदार्थाः तेषां संग्रहः संक्षेपेण स्वरूपकथनमित्यर्थः॥ इदं प्रयोजनं
ह· सुखबोधायेति· सुखेन अनायासेन बोधः पदार्थज्ञानं तस्मै इत्यर्थः॥ ननु बहुषु तर्कग्रंथेषु सत्सु किमर्थमपूर्वोयं ग्रंथः क्रियत इत्यत आह॥ बालानामिति· ते-
षां [illegible]त्वात् बालानां बोधो न भवतीत्यर्थः॥ ग्रहणधारणपटुर्बालः न तु स्तनंधयः॥ किं कृत्वा क्रियत इत्यत आह· निधायेति· विश्वेश्वरं जगत्कर्तारं सांबं
[illegible] स्थापयित्वेत्यर्थः। पदार्थान् विभजते· द्रव्येति· पदस्यार्थः पदार्थः इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणं। ननु विभागादेव सप्तत्वे
२ [illegible] धिकसंख्याव्यवच्छेदार्थत्वात्· ननु अतिरिक्तः पदार्थो प्रमितो न वा· नाद्यः प्रमितस्यानपलापायोगात्· नांत्यः। प्रतियोगिप्रमितिं विना निषेधा-
नुपपत्तेरिति चेन्न· पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात्· एवमग्रेपि द्रष्टव्यं· द्रव्याणि विभजते· तत्रेति· तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः।
नित्यत आह· पृथिवीत्यादि ननु तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नवैव द्रव्याणि· तथाहि· नीलं तमश्चलतीति अबाधितप्रतीतिबलेन नीलरूपाधारत्व-
धारतया च द्रव्यत्वं [illegible] तत्र तमसो नाकाशादिपंचके अंतर्भावः रूपवत्वादत एव न वायौ सदागतिमत्वाभावाच्च। नापि तेजसि· भास्वररूपाभावात् उष्णस्प-
र्शाभावाच्च· नापि जले शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च· नापि पृथिव्यां गंधाभावात् स्पर्शरहितत्वाच्च· तस्मात् तमो दशमं द्रव्यमिति चेन्न· तमसः तेजोभावरूपत्वात्·
तमो हि न रूपवद्द्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत्· [illegible] चाक्षुषप्रमायां आलोकस्य कारणत्वात् तस्मात् प्रौढप्रकाशकतेजःसामान्याभावस्त-
मः नीलं तमश्चलतीति प्रत्ययो भ्रमः। अतो नवैव द्रव्याणीति· द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणं। लक्ष्यैकदेशावृत्तित्वमव्याप्तिः। यथा गोः कपिलत्वं। अलक्ष्य-

स्पर्शाभावा ४ लक्ष्य [illegible]

दशमं ३ गो

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव कृतिना कार्यः प्रयत्नो महान् संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥

१

[redacted]

८

५४०

[illegible]